श्री कमला स्तोत्रं

श्री कमला स्तोत्रं

ओंकाररूपिणी देवि विशुद्धसत्त्वरूपिणी |
देवानां जननी त्वं हि प्रसन्ना भव सुंदरि || 1 ||

तन्मात्रं चैव भूतानि तव वक्षःस्थलं स्मृतं |
त्वमेव वेदगम्या तु प्रसन्ना भव सुंदरि || 2 ||

देव दानव गंधर्व यक्ष राक्षस किन्नरैः |
स्तूयसे त्वं सदा लक्ष्मि प्रसन्ना भव सुंदरि || 3 ||

लोकातीता द्वैतातीता समस्तभूतवेष्टिता |
विद्वज्जनकीर्तिता च प्रसन्ना भव सुंदरि || 4 ||

परिपूर्णा सदा लक्ष्मि त्रात्री तु शरणार्थिषु |
विश्वाद्या विश्वकर्त्री च प्रसन्ना भव सुंदरि || 5 ||

ब्रह्मरूपा च सावित्री त्वद्दीप्त्या भासते जगत् |
विश्वरूपा वरेण्या च प्रसन्ना भव सुंदरि || 6 ||

क्षित्यप्तेजोमरुद्व्योमपंचभूतस्वरूपिणी |
बंधादेः कारणं त्वं हि प्रसन्ना भव सुंदरि || 7 ||

महेशे त्वं हैमवती कमला केशवेऽपि च |
ब्रह्मणः प्रेयसी त्वं हि प्रसन्ना भव सुंदरि || 8 ||

चंडी दुर्गा काळिका च कौशिकी सिद्धिरूपिणी |
योगिनी योगगम्या च प्रसन्ना भव सुंदरि || 9 ||

बाल्ये च बालिका त्वं हि यौवने युवतीति च |
स्थविरे वृद्धरूपा च प्रसन्ना भव सुंदरि || 10 ||

गुणमयी गुणातीता आद्या विद्या सनातनी |
महत्तत्त्वादिसंयुक्ता प्रसन्ना भव सुंदरि || 11 ||

तपस्विनी तपः सिद्धिः स्वर्गसिद्धिस्तदर्थिषु |
चिन्मयी प्रकृतिस्त्वं तु प्रसन्ना भव सुंदरि || 12 ||

त्वमादिर्जगतां देवि त्वमेव स्थितिकारणं |
त्वमंते निधनस्थानं स्वेच्छाचारा त्वमेव हि || 13 ||

चराचराणां भूतानां बहिरंतस्त्वमेव हि |
व्याप्यव्यापकरूपेण त्वं भासि भक्तवत्सले || 14 ||

त्वन्माययया हृतज्ञाना नष्टात्मानो विचेतसः |
गतागतं प्रपद्यंते पापपुण्यवशात्सदा || 15 ||

तावत्सत्यं जगद्भाति शुक्तिकारजतं यथा |
यावन्न ज्ञायते ज्ञानं चेतसा नान्वगामिनी || 16 ||

त्वज्ज्ञानात्तु सदा युक्तः पुत्रदारगृहादिषु |
रमंते विषयान् सर्वानंते दुःखप्रदान् ध्रुवं || 17 ||

त्वदाज्ञया तु देवेशि गगने सूर्यमंडलं |
चंद्रश्च भ्रमते नित्यं प्रसन्ना भव सुंदरि || 18 ||

ब्रह्मेशविष्णुजननी ब्रह्माख्या ब्रह्मसंश्रया |
व्यक्ताऽव्यक्ता च देवेशि प्रसन्ना भव सुंदरि || 19 ||

अचला सर्वगा त्वं हि मायातीता महेश्वरि |
शिवात्मा शाश्वता नित्या प्रसन्ना भव सुंदरि || 20 ||

सर्वकार्यनियंत्री च सर्वभूतेश्वरेश्वरी |
अनंता निष्काला त्वं हि प्रसन्ना भवसुंदरि || 21 ||

सर्वेश्वरी सर्ववंद्या अचिंत्या परमात्मिका |
भुक्तिमुक्तिप्रदा त्वं हि प्रसन्ना भव सुंदरि || 22 ||

ब्रह्माणी ब्रह्मलोके त्वं वैकुंठे सर्वमंगळा |
इंद्राणी अमरावत्यामंबिका वरुणालये || 23 ||

यमालये कालरूपा कुबेरभवने शुभा |
महानंदाग्निकोणे च प्रसन्ना भव सुंदरि || 24 ||

नैर्ऋत्यां रक्तदंता त्वं वायव्यां मृगवाहिनी |
पाताळे वैष्णवीरूपा प्रसन्ना भव सुंदरि || 25 ||

सुरसा त्वं मणिद्वीपे ऐशान्यां शूलधारिणी |
भद्रकाळी च लंकायां प्रसन्ना भव सुंदरि || 26 ||

रामेश्वरी सेतुबंधे सिंहले देवमोहिनी |
विमला त्वं च श्रीक्षेत्रे प्रसन्ना भव सुंदरि || 27 ||

काळिका त्वं काळिघट्टे कामाख्या नीलपर्वते |
विरजा औड्रदेशे त्वं प्रसन्ना भव सुंदरि || 28 ||

वाराणस्यामन्नपूर्णा अयोध्यायां महेश्वरी |
गयासुरी गयाधाम्नि प्रसन्ना भव सुंदरि || 29 ||

भद्रकाळी कुरुक्षेत्रे कृष्ण कात्यायनी व्रजे |
महामाया द्वारकायां प्रसन्ना भव सुंदरि || 30 ||

क्षुधा त्वं सर्वजीवानां वेला च सागरस्य हि |
महेश्वरी मथुरायां प्रसन्ना भव सुंदरि || 31 ||

रामस्य जानकी त्वं च शिवस्य मनमोहिनी |
दक्षस्य दुहिता चैव प्रसन्ना भव सुंदरि || 32 ||

विष्णुभक्तिप्रदा त्वं च कंसासुर विनाशिनी |
रावणनाशिनी चैव प्रसन्ना भव सुंदरि || 33 ||

लक्ष्मीस्तोत्रमिदं पुण्यं यः पठेद्भक्तिसंयुतः |
सर्वज्वरभयं नश्येत् सर्वव्याधिनिवारणं || 34 ||

इदं स्तोत्रं महापुण्यमापदुद्धारकारणं |
त्रिसंध्यमेकसंध्यं वा यः पठेत् सततं नरः || 35 ||

मुच्यते सर्वपापेभ्यस्तथा तु सर्वसंकटात् |
मुच्यते नात्र संदेहो भुवि स्वर्गे रसातले || 36 ||

समस्तं च तथा चैकं यः पठेद्भक्तितत्परः |
स सर्वदुष्करं तीर्त्वा लभते परमां गतिं || 37 ||

सुखदं मोक्षदं स्तोत्रं यः पठेद्भक्तिसंयुतः |
स तु कोटितीर्थफलं प्राप्नोति नात्र संशयः || 38 ||

एका देवी तु कमला यस्मिंस्तुष्टा भवेत्सदा |
तस्याऽसाध्यं तु देवेशि नास्तिकिंचिज्जगत्त्रये || 39 ||

पठनादपि स्तोत्रस्य किं न सिद्ध्यति भूतले |
तस्मात् स्तोत्रवरं प्रोक्तं सत्यं सत्यं हि पार्वति || 40 ||

इति श्री कमला स्तोत्रं |